International Journal of Sanskrit Research 2016; 2(1): 83-85

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 83-85
© 2016 IJSR
www.anantaajournal.com
Received: 25-11-2015
Accepted: 30-12-2015

**जयकान्तसिंहशर्मा**
प्रोफेसर, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, कटवारिया सराय, नई दिल्ली, भारत

Corresponding Author:
**जयकान्तसिंहशर्मा**
प्रोफेसर, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, कटवारिया सराय, नई दिल्ली, भारत

# पृषोदरादित्वात्पदसाधुत्वव्यवस्था

## जयकान्तसिंहशर्मा

**सारांश**

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।।[1]

वैयाकरणप्रकाण्डस्य भर्तृहरेर्वचनमिदं धर्मविषये प्रमाणान्तरापेक्षया आगमस्यानितरसाधारणं महत्त्वं सुदृढमभिधत्ते, शब्दसंस्कारकस्य व्याकरणस्य सतां शब्दानां व्युत्पादनमेकं महत्कार्यं विद्यते; यदाधारेण शब्दाशब्दविवेक: परिस्फुरति लोकस्य,अपभ्रंशेष्वप्यर्थबोधकतायाः साम्येऽपि पुण्यजनकतां तु साधुष्वेव निश्चिनोति महाभाष्यकार-:

समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते इति[2]

**कूटशब्द:** वैयार्करणप्रर्काण्डस्य, धममतवषये, अिभ्रंशेष्वप्यर्मबोधर्कतायाा:

### प्रस्तावना

### विवेचनम्

इत्थन्तेन व्याकरणेन संस्कृतानां शब्दानामेव प्रयोगविषयताऽऽस्थीयते । इदं हि नैयून्यमेव स्यात्तद्व्याकरणस्य, यद्द्वारा लोके प्रयुज्यमानेष्वेकस्यापि व्युत्पादनमवशिष्यते । अतो महत्या सूक्ष्मेक्षिकया ऋषिर्वाङ्मये विततमपि विपुलं शब्दजातं स्वव्युत्पाद्यतयाऽऽकलय्य सूत्रादिरचनया अनुशास्ति, तेषु प्रयोग- योग्यताञ्चादधाति । इदं करामलकवत्सर्वं साक्षात्कुर्वाणानान्तथाविधाना- मृषीणामेव माहात्म्यम्, यत्ते शास्त्रप्रवृत्तिकाले प्रभवन्ति वक्तुम् -"अनभिधानान्न भवति"इति ।

यद्यपि अन्वाख्येयानान्तेषां व्याकरणसंस्कृतानामेव साधुतया पुण्यजनकता, तथापि शास्त्रेऽस्मिन् प्रयुक्तानां टिघुघप्रभृतिसञ्ज्ञानां शिष्टोच्चारितानामन्येषाञ्च शब्दानां साधुत्वाय सूत्रकारः स्वयं चिन्तयति, तथाविधानां प्रयोगार्हतां साधुत्वसाधनाय प्रतिजानीते - "पृषोदरादीनि यथोपदिष्टम्" इति।[3]

सूत्रेऽस्मिन्नुपदेश उच्चारणम् उपदिष्टमित्यत्र कर्मणि क्तप्रत्ययः उपदिष्टमनतिक्रम्य यथोपदिष्टम् इति बालमनोरमाकार[4]।: किन्तु तत्त्वबोधिनीकारस्तु यथार्थेऽव्ययीभावं विलिख्य कस्मिन्नर्थविशेषे अव्ययीभाव इति न निर्दिशति[5]। न्यासकारस्तु यथाऽसादृश्ये इति वीप्सायामव्ययीभावं लिखति[6]। अतो यानि यानि शिष्टैरुच्चारितानि, तानि तानि साधुत्वेनावगन्तव्यानीत्यर्थो लभ्यते।

उपदेशस्य कर्तृजिज्ञासायां भाष्ये शिष्टैरित्युक्तम्, शिष्टाश्च शब्दतत्त्वसाक्षात्कारवन्तो योगिन इति भाष्ये निर्णीतमिति शेखरकार[7]।:

पृषोदरादीनीत्यत्र आदिशब्दो न प्रभृतिवाची, किन्तु प्रकारवाची, प्रकारश्च सादृश्यम्, सादृश्यश्चात्र शास्त्रोक्तलोपागमादेशादिरहितत्वेन बोध्यम्, तेन व्याकरणशास्त्रेणागृही- तानीति बोध्यते। यद्यत्र व्यवस्थावाची आदिशब्दः स्यात्तदा यथोपदिष्टमिति पदं व्यर्थं स्यात्, व्यवस्था- वाचित्वे हि यान्येव गणे पठ्यन्ते तेषामेव साधुत्वं स्यान्नान्येषाम्, प्रकारवचन आदिशब्दे स्वीक्रियमाणे गणेऽपठितानामपि साधुत्वं बोध्यते । इत्थं यथा पृषोदरशब्दे लोपादिकार्यं शास्त्रेणाविहितं दृश्यते, तथा अन्यत्रापि लोपादिकार्यं शास्त्रेणाविहितं दृश्यते, तादृशानि शिष्टैर्यदानुपूर्वीतया यथोच्चारितानि प्रयुक्तानि वा तानि तथैव साधूनि भवन्तीत्यर्थः फलति। उत्तरपदाधिकारे पठितमिदं सूत्रं विभाव्य पदमञ्जरीकारो- ऽस्य सूत्रस्य विषयविशेषमवधारयन्नाह -

"निरुक्तादिशास्त्रसिद्धानामसमासपदानाम् उणादयो बहुलमिति सिद्धिरुक्ता, अनेन तु समासपदानां जीमूतबलाहकादीनां सिद्धिरुच्यते" इति।[8]

तत्त्वबोधिनीकारोऽप्यस्य आक्षेपसमाधानमुखेन समासपदविषयकत्वमेव पुष्णाति तद्यथा यद्यपि - समासविषयकमेवेति नियमो न युज्यते, हंससिंहशब्दयोरपि प्राचां कारिकायामुदाहृतत्वात्तथापि तत्कारिकायां यथा शब्दाध्याहारेण दृष्टान्तप्रदर्शनार्थं तयोरुपन्यासः कृतो न तु प्रकृतसूत्रोदाहरणत्वेनेति नियमोक्तिः सम्यगेवेति।[9]
श्रीमान् नागेशभट्टस्तु परे त्वित्यादिनास्य तद्धितविषयतामपि समावेशयति, फलञ्च निर्दिशति पुराणशब्देऽनेन तलोप इति सर्वादिसूत्रे कैयटात्। एवञ्च हंसादेरुणाद्यन्तत्वेन शास्त्रान्तरस्यापि अनेन साधुत्वं सर्पिषोत्यादौ षत्वमप्यनेनैवेत्याहु[10]।:
महाभाष्ये के पुनः शिष्टा इति प्रश्ने वैयाकरणा इत्युक्त्वा तद्विशेष उच्यते निवासत आचारतश्चे- त्युदीर्य वैशिष्ट्येन ते लक्षिता णाःएतस्मिन्नार्यावर्ते निवासे ये ब्राह्म -:कुम्भीधान्या अलोलुपा अगृह्यमा- णाकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्याया [11]पारङ्गतास्तत्र भवन्तः शिष्टा इति। :

तादृशशिष्टानेव लक्षयितुं तद्वैभवप्रकाशनमुखेन भर्तृहरेरिदं वचनं प्रास्तौत्प्रदीपे कैयट[12]।:

आविर्भूतप्रकाशानामनपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते।।
अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ।।

तादृशानान्तेषामनपप्लुतचेतस्त्वं विहितकर्मानुष्ठानेन शुद्धान्तःकरणत्वम् अत एव आविर्भूत- प्रकाशत्वं, तच्च अविद्यापगमेन योगाभ्याससहकृतप्रत्यक्षेण आविर्भूतसर्वज्ञानानां विद्यमानवस्तु- विषयकं यथाऽस्मदादिप्रत्यक्षं भवति, तद्वदेव तेषां सर्वविषयकं प्रत्यक्षम् । यच्च बाह्येन्द्रियैरग्राह्यम् अन्यैर्मनसाप्यनुपलभ्यं तादृशमपि ते योगाभ्याससहकृतदिव्यचक्षुषा साक्षात्कुर्वन्ति, गुरूपदेशम् अभ्यासादिकं विनैव तेषां सर्वविद्यापारगत्वम् । अतः शिष्टवचनाद्विरुद्धमनुमानमपि प्रमाणं न भवतीति स्पष्टयति प्रदीपोद्योते श्रीनागेशः। [13]
तादृशास्ते नूनं साधुत्वपरिज्ञाने प्रमाणं भवन्ति अत्रैव निरुक्तशास्त्रे ये शब्दा निरूप्यन्ते तेषां पृषोदरादित्वात्साधुत्वमिष्यते इति बोधयितुमुदाहरणद्वारा पञ्चधा निर्वचनस्य बोधिकां कारिकाम् अवतारयति वृत्तिकार-:

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थाभिनयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥[14]

1. वर्णागमो नाम अपूर्वस्य नकारादेर्वर्णस्य प्राप्तिः तद्यथा, कौ जीर्यते कुञ्जर इत्यत्र कुशब्दस्य नुगागमः।[15]
2. वर्णविपर्ययो नाम वर्णस्थाने व्यत्यासः तद्यथा, हिनस्तीति सिंह इत्यत्र पचाद्यचि कृते हकारसकारयोः स्थानव्यत्यासः।[16]
3. वर्णविकारो नाम वर्णस्य रूपान्तरापत्तिः, यथा षोडन् इत्यत्र षकारस्योत्वरूपापत्तिः, दकारस्य च डकाररूपापत्ति[17]। :
4. वर्णनाशो नाम वर्णलोपः तद्यथा, पृषत उदरं पृषोदर इत्यत्र तकारलोपः।[18]
5. धातोरर्थातिशयेन योगो नाम धातो : प्रसिद्धादर्थादर्थान्तरेण सम्बन्धः तद्यथा, मह्यां रौतीति मयूरः, अत्र रुशब्दे धातोः रमणार्थेन अतिशयेन सम्बन्ध[19]।:

यद्यपि गणपाठे पृषोदर-पृषोत्थान-बलाहक-जीमूत-श्मशान-उलूखल-पिशाच-वृसी-मयूरेति नव शब्दाः पठिताः, काशिकावृत्तौ नवैव सविवेचनं निरूपिताः। किन्तु अन्ते एवमन्येऽपि अश्वत्थकपित्थ- प्रभृतयो यथायोगमनुगन्तव्या इति लिखितम्।[20] तथा हि, न श्वश्चिरं तिष्ठतीति अश्वोपपदे सुपि स्थ इति तिष्ठतेः कप्रत्यये पृषोदरादित्वात्सकारस्य तकारः।[21]
कपयस्तिष्ठन्ति अत्र कपित्थः, अत्रापि । अत्रादिपदेन लोक एवंविधानां शब्दानां परामर्शः तथा उल्लङ्घितमम्बरमनेन उदुम्बरः,[22]कुं भूमिं विदारयतीति पृषोदादित्वादेव कोविदारः,[23] शुभं कर्म स्यति समापयति इति कल्मषम्, अत्रापि पृषोदरादित्वाल्लत्वषत्वे।[24] मतं मतिमलतीति अल

भूषणादौ धातोः ण्वुलि पृषोदरादित्वादस्य लत्वे मतल्लिका।[25]
वजति कार्यं गच्छतीति पृषोदरादित्वाद् ईत्वेन बीजम्।[26] द्वौ परौ प्रकारौ यस्य, द्विशब्दस्य पूर्व निपाते पृषोदरादित्वादात्वे द्वापरमिति।[27] पण्ड्यते ज्ञायत इति पाण्डुः अत्र पडि गतौ धातो :मृगय्वा- दित्वात्कुः पृषोदरादित्वाद्दीर्घः।[28] धीमतामयं धैवतः,[29] अत्रापि पृषोदरादित्वात् मस्य वत्वम् । विरचय- तीति विरिञ्चिः, अत्र पृषोदरादित्वादस्येत्वं नुमागमश्च।[30] गरुद्भिर्डयते गरुडः, अत्र पृषोरादित्वात्त- लोपः। [31]शतं ह्रादा यस्या शतह्रदा[32] इत्यत्र पृषोदरादित्वात् ह्रस्वः । अततीति तिथिः, अत्र अत धा- तोरतेरिथिन् इत्युणादिप्रत्यये पृषोदरादित्वात् अलोपः।[33] मुक्तिं ददातीति मुकुन्दः, अत्र पृषोदरादि- त्वादेव सिद्धिः।[34] वातं कोचयतीति वाकूचीत्यत्र पृषोदरादित्वात्तलोपो दीर्घश्च। सलतीति क्वुन्प्रत्यये पृषोदरादित्वाल्लत्वेन सल्लकी। झिल्लिकेत्यत्र चिल्ल् धातोश्चस्य झत्वं पृषोदरादित्वात्। चिरेणाटतीति चिरण्टीत्यत्र पृषोदरादित्वादेव रूपम्। शशतीति शिश्न इत्यत्र पृषोदरादित्वान्नक् । मस्तिं मस्कते इत्यत्र मस्क गतौ धातोरचि पृषोदरादित्वाद् मस्तिष्कमिति । कं शुभं कणतीति कङ्कणमिति पृषोदरादित्वाद् णत्वम् । मर्षणात्सहनाच्च मारिष इत्यत्र पृषोदरादित्वादेव रूपसिद्धिः। अवहिः स्थितिरवहित्था इत्यपि पृषोदरादित्वादेव।[35] ह्रादत इति ह्रदः, अत्र पृषोदरादित्वाद् ह्रस्वः,आशीविष इत्यत्र आशी दंष्ट्रा, तत्र विषमस्य, अत्र पृषोदरादित्वाद्दीर्घः सलोपश्च । नदीवाचकधुनीशब्देऽपि धुनोति वेतसादीनिति क्विपि पृषोदरादित्वान्नुक् नान्तत्वाच्च ङीप् । कस्य जलस्य हार इवेति पृषोदरादित्वात्कह्लारम् । किञ्चत्सलतीति किसलयम् पृषोदरादिः।[36] कूटे शृङ्गे जायते स्मेति डप्रत्यये पृषोदरादित्वाद् ह्रस्वे कुटज इति।[37] इत्येवमनेके शब्दा भाषायामुपलभ्यन्ते ये पृषोदरादित्वादेव साधुत्वं भजन्ते, सिनोति बध्नाति स्वगुणैर्भगवन्तं रामचन्द्रं या सा सीताऽप्यत्र[38] दीर्घो भवतु कुशश्च लवश्च कुशीलवाविति पद ईत्वं वा भवतु । सर्वत्र पृषोदरादित्वादेव रूपनिष्पत्तिः चीर्णमित्यस्यान्यथा कथङ्कारं व्युत्पादनं स्यादिति पाणिनेः सताम् अपि शब्दानां व्युत्पादनकौशलं केन तिरोधातुं शक्येतेति शम् ।
इत्थं भगवान् पाणिनिः शिष्टोच्चरितत्वादेषां पृषोदरादित्वमादाय साधुत्वं व्यवस्थापितम् ।

## सन्दर्भ


1. वाक्यपदीये ब्रह्मकाण्डे 1-30
2. महाभाष्ये प्रथमाह्निके
3. पा .सू .6-3-109
4. अत्रैव बालमनोरमाटीकायाम्
5. तत्रैव तत्वबोधिन्याम्
6. तत्रैव 6-3-109 न्यासे
7. लघुशब्देन्दुशेखरे समासाश्रयविधौ
8. पा .सू .06-03-109 इत्यत्र पदमञ्जरी
9. प्रकृतसूत्रव्याख्यायाम् सिद्धान्तकौमुदी तत्वबोधिन्याम्
10. सिद्धान्तकौमुदी, लघुशब्देन्दुशेखरेमासाश्रयप्रकरणे -.पृ630
11. पा.सू.6-3-109इत्यत्र महाभाष्ये
12. अत्रैव महाभाष्यकैयटप्रदीपे
13. प्रकृतसूत्रमहाभाष्ये प्रदीपोद्योते
14. पा .सू.6-3-109 इत्यत्र काशिकायाम्
15. तत्रैव काशिकान्यासे पृ .113
16. तत्रैव काशिकान्यासे
17. तत्रैव काशिकान्यासटीकायाम्
18. तत्रैव काशिकान्यासे
19. तत्रैव न्यासे
20. प्रकृतसूत्रे काशिकावृत्तौ पृ.111
21. तत्रैव न्यासे पृ .111
22. अमरकोष 2-4-33 सुधाटीकायाम् पृ.51
23. तत्रैव
24. अमर कोष रामाश्रमी टीकायाम् पृ.51
25. अमरकोष 1-4-27 पृ.53
26. अमरकोष 1-4-28 पृ.54
27. अमरकोष 1-5-3 पृ .56
28. अमरकोष 1-5-13 पृ.61
29. अमरकोष 1-7-1 पृ.71
30. अमरकोष 1-1-17पृ.8
31. अमरकोषअमरकोष 1-1-29 पृ.13
32. अमरकोष 1-3-9पृ.32
33. अमरकोष 1-4-1 पृ.44
34. अमरकोष 1-4-121 पृ.170
35. अमरकोष 1-7-34 पृ .45
36. अमरकोष 2-4-14 पृ.133
37. अमरकोष2-4-66पृ .150
38. मानसपीयूष.प्रथमभाग पृ-25 (गीताप्रेस गोरखपुर)